# ॥ श्रीमूकाम्बिकायाः अष्टोत्तरशतनामावलिः ॥

.. Shri MukambikA AshtottarashatanamAvali ..

sanskritdocuments.org

August 20, 2017

.. Shri MukambikA AshtottarashatanamAvali ..

॥ श्रीमूकाम्बिकायाः अष्टोत्तरशतनामावलिः ॥

## Sanskrit Document Information

Text title : shrii muukaambikaayaaH aShTottarashatanaamaavaliH

File name : mUkAmbikA108.itx

Category : aShTottarashatanAmAvalI, devii, otherforms, nAmAvalI

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : R. Harshananda harshanand_16 at rediffmail.com

Description-comments : Mookambika ashtottara namavali

Latest update : April 17, 2002, August 6, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ श्रीमूकाम्बिकायाः अष्टोत्तरशतनामावलिः ॥

जय जय शङ्कर !
ॐ श्री ललिता महात्रिपुरसुन्दरी पराभट्टारिका समेताय
श्री चन्द्रमौळीश्वर परब्रह्मणे नमः !

ॐ श्रीनाथादितनूत्थश्रीमहालक्ष्म्यै नमो नमः ।
ॐ भवभावित चित्तेजः स्वरूपिण्यै नमो नमः ।
ॐ कृतानङ्गवधूकोटि सौन्दर्यायै नमो नमः ।
ॐ उद्यदादित्यसाहस्रप्रकाशायै नमो नमः ।
ॐ देवतार्पितशस्त्रास्त्रभूषणायै नमो नमः ।
ॐ शरणागत सन्त्राणनियोगायै नमो नमः ।
ॐ सिंहराजवरस्कन्धसंस्थितायै नमो नमः ।
ॐ अट्टहासपरित्रस्तदैत्यौघायै नमो नमः ।
ॐ महामहिषदैत्येन्द्रविघातिन्यै नमो नमः ।
ॐ पुरन्दरमुखामर्त्यवरदायै नमो नमः ।
ॐ कोलर्षिप्रवरध्यानप्रत्ययायै नमो नमः ।
ॐ श्रीकण्ठक्लृप्तश्रीचक्रमध्यस्थायै नमो नमः ।
ॐ मिथुनाकारकलितस्वभावायै नमो नमः ।
ॐ इष्टानुरूपप्रमुखदेवतायै नमो नमः ।
ॐ तप्तजाम्बूनदप्रख्यशरीरायै नमो नमः ।
ॐ केतकीमालतीपुष्पभूषितायै नमो नमः ।
ॐ विचित्ररत्नसंयुक्तकिरीटायै नमो नमः ।
ॐ रमणीयद्विरेफालिकुन्तलायै नमो नमः ।
ॐ अर्धशुभ्रांशु विभ्राजल्ललाटायै नमो नमः ।
ॐ मुखचन्द्रान्तकस्तूरीतिलकयै नमो नमः ।
ॐ मनोज्ञवक्रभ्रूवल्लीयुगलायै नमो नमः ।
ॐ रजनीशदिनेशाग्निलोचनायै नमो नमः ।
ॐ करुणारससंसिक्तनेत्रान्तायै नमो नमः ।
ॐ चाम्पेयकुसुमोद्भासिनासिकायै नमो नमः ।
ॐ तारकाभनसारत्नभासुरायै नमो नमः ।
ॐ सद्रत्नखचितस्वर्णताटङ्कायै नमो नमः ।

ॐ रत्नादर्शप्रतीकाशकपोलायै नमो नमः ।
ॐ ताम्बूलशोभितवरस्मितास्यायै नमो नमः ।
ॐ कुन्दकुड्मलसङ्काशदशनायै नमो नमः ।
ॐ फुल्लप्रवालरदनवसनायै नमो नमः ।
ॐ स्वकान्तस्वान्तविक्षोभिचिबुकायै नमो नमः ।
ॐ मुक्ताहारलसत्कम्बुकन्धरायै नमो नमः ।
ॐ साष्टापदाङ्गदभुजचतुष्कायै नमो नमः ।
ॐ शङ्खचक्रवराभीतिकराब्जायै नमो नमः ।
ॐ मतङ्गजमहाकुम्भवक्षोजायै नमो नमः ।
ॐ कुचभारनमन्मञ्जुमध्यमायै नमो नमः ।
ॐ तटित्पुञ्जाभकौशेयसुचेलायै नमो नमः ।
ॐ रम्यकिङ्किणिकाकाञ्चीरञ्जितायै नमो नमः ।
ॐ अतिमञ्जुलरम्भोरुद्वितयायै नमो नमः ।
ॐ माणिक्यमुकुटाष्ठीवसंयुक्तायै नमो नमः ।
ॐ देवेशमुकुटोद्दीप्तपदाब्जायै नमो नमः ।
ॐ भार्गवाराध्यगाङ्गेयपादुकायै नमो नमः ।
ॐ मत्तदन्तावलोत्तंसगमनायै नमो नमः ।
ॐ कुङ्कुमागरुभद्रश्रीचर्चिताङ्ग्यै नमो नमः ।
ॐ सचामरामरीरत्नवीजितायै नमो नमः ।
ॐ प्रणताखिलसौभाग्यप्रदायिन्यै नमो नमः ।
ॐ दानवार्दितशक्रादिसन्नुतायै नमो नमः ।
ॐ धूम्रलोचन दैतेयदहनायै नमो नमः ।
ॐ चण्डमुण्डमहाशीर्षखण्डनायै नमो नमः ।
ॐ रक्तबीजमहादैत्यशिक्षकायै नमो नमः ।
ॐ मदोद्धतनिशुम्भाख्यभञ्जनायै नमो नमः ।
ॐ घोरशुम्भासुराधीशनाशनायै नमो नमः ।
ॐ मधुकैटभसंहारकारणायै नमो नमः ।
ॐ विरिञ्चिमुखसङ्गीतसमज्ञायै नमो नमः ।
ॐ सर्वबाधाप्रशमनचरित्रायै नमो नमः ।
ॐ समाधिसुरथक्ष्माभृदर्चितायै नमो नमः ।
ॐ मार्कण्डेयमुनिश्रेष्ठसंस्तुतायै नमो नमः ।

ॐ व्यालासुरद्विषद्विष्णुस्वरूपिण्यै नमो नमः ।
ॐ क्रूरवेत्रासुरप्राणमारणायै नमो नमः ।
ॐ लक्ष्मीसरस्वतीकालीवेषाढ्यायै नमो नमः ।
ॐ सृष्टिस्थितिलयक्रीडातत्परायै नमो नमः ।
ॐ ब्रह्मोपेन्द्रगिरीशादिप्रतीक्षायै नमो नमः ।
ॐ अमृताब्धिमणिद्वीपनिवासिन्यै नमो नमः ।
ॐ निखिलानन्दसन्दोहविग्रहायै नमो नमः ।
ॐ महाकदम्बविपिनमध्यगायै नमो नमः ।
ॐ अनेककोटिब्रह्माण्डजनन्यै नमो नमः ।
ॐ मुमुक्षुजनसन्मार्गदर्शिकायै नमो नमः ।
ॐ द्वादशान्तषडम्भोजविहारायै नमो नमः ।
ॐ सहस्रारमहापद्मसदनायै नमो नमः ।
ॐ जन्मप्रमुखषड्भाववर्जितायै नमो नमः ।
ॐ मूलाधारादिषट्चक्रनिलयायै नमो नमः ।
ॐ चराचरात्मकजगत्सम्प्रोतायै नमो नमः ।
ॐ महायोगिजनस्वान्तनिशान्तायै नमो नमः ।
ॐ सर्ववेदान्तसत्सारसंवेद्यायै नमो नमः ।
ॐ हृदिनिक्षिप्तनिःशेषब्रह्माण्डायै नमो नमः ।
ॐ राजराजेश्वरप्राणवल्लभायै नमो नमः ।
ॐ तुषाराचलराजन्यतनयायै नमो नमः ।
ॐ सर्वात्मपुण्डरीकाक्षसहोदर्यै नमो नमः ।
ॐ मूकीकृतमहामूकदानवायै नमो नमः ।
ॐ दुष्टमूकशिरः शैलकुलिशायै नमो नमः ।
ॐ कुटजोपत्यकामुख्यनिवासायै नमो नमः ।
ॐ वरेण्यदक्षिणार्धाङ्गमहेशायै नमो नमः ।
ॐ ज्योतिश्चक्रासनाभिख्यपीठस्थायै नमो नमः ।
ॐ नवकोटिमहदुर्गासंवृतायै नमो नमः ।
ॐ विघ्नेशस्कन्दवीरेशवत्सलायै नमो नमः ।
ॐ कलिकल्मषविध्वंससमर्थायै नमो नमः ।
ॐ षोडशार्णमहामन्त्रमन्दिरायै नमो नमः ।
ॐ पञ्चप्रणवलोलम्बपङ्कजायै नमो नमः ।

ॐ मिथुनार्चनसंहृष्टहृदयायै नमो नमः ।
ॐ वसुदेवमनोभीष्टफलदायै नमो नमः ।
ॐ कंसासुरवराराातिपूजितायै नमो नमः ।
ॐ रुक्मिणीसत्यभामादिवन्दितायै नमो नमः ।
ॐ नन्दगोपप्रियागर्भसम्भूतायै नमो नमः ।
ॐ कंसप्राणापहरणसाधनायै नमो नमः ।
ॐ सुवासिनीवधूपूजासुप्रीतायै नमो नमः ।
ॐ शशाङ्कशेखरोत्सङ्गविष्ठरायै नमो नमः ।
ॐ विभुधारिकुलारण्यकुठारायै नमो नमः ।
ॐ सञ्जीवनौषधत्रातत्रिदशायै नमो नमः ।
ॐ मातृसौख्यार्थि पक्षीशसेवितायै नमो नमः ।
ॐ कटाक्षलब्धशक्रत्व प्रद्युम्नायै नमो नमः ।
ॐ इन्द्रक्लृप्तोत्सवोत्कृष्टप्रहृष्टायै नमो नमः ।
ॐ दारिद्र्यदुःखविच्छेदनिपुणायै नमो नमः ।
ॐ अनन्यभावस्वर्गापवर्गदायै नमो नमः ।
ॐ अप्रपन्न भवत्रासदायकायै नमो नमः ।
ॐ निर्जिताशेषपाषण्डमण्डलायै नमो नमः ।
ॐ शिवाक्षिकुमुदाह्लादचन्द्रिकायै नमो नमः ।
ॐ प्रवर्तितमहाविद्याप्रधानायै नमो नमः ।
ॐ सर्वशक्त्यैकरूप श्रीमूकाम्बायै नमो नमः ॥

इति मूकाम्बिकाष्टोत्तरशतनामावलिः सम्पूर्णा ॥

Encoded by R. Harshananda harshanand_16@rediffmail.com

.. Shri MukambikA AshtottarashatanamAvali ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*